आशौचसंग्रहे

त्रिंशत्ती सटीक पत्रसंख्या १४॥

५

॥श्रीगणेशायनमः॥ नत्वा गणेश्वरं देवं शारदां गुरुमात्मनः॥ आशौचसंग्रहं त्रिंशत् श्लोक्या व्याख्यां करोम्यहं॥१॥ तत्र स्मार्त्तक्रमं समुल्लंघ्य लोकप्रसिद्धक्रममनुसरन् गर्भविपत्तिनिमित्तं शौचक्रमेणाशौचं प्रतिपादयति। प्रसूयायमन्वयः।

षण्मासाभ्यंतरेषु षण्णां मासानामभ्यंतराणि मध्यानि तेषु। स्वपुरुषनिहिते भर्तृनिहिते गर्भमात्रे अपूर्णावयवे गर्भे विनष्टे सुते माता जननी तन्माससंख्यासमदिनैस्तेषां मासानां गर्भधारणादारभ्य प्रसेकपर्यन्तं संख्या तया समानि दिनानि यत्र तद्यथा भवति तथा अशुचिरशुद्धा स्यात्। अत्र स चासौ मासश्च तन्मासस्तस्य संख्या तया समानि दिनानि यस्मिन्निति समासः। तथा चायमर्थः। गर्भधारणमासमादिं कृत्वा यन्मासाभ्यंतरे गर्भो नष्टः तन्माससंख्यया समदिनानीति। अत्र यद्यपि विशेषेण नोक्तं तथापि चतुर्थमासमारभ्य

षण्मासाभ्यंतरेषु स्वपुरुषनिहिते गर्भमात्रे विनष्टे माता तन्माससंख्यासमदिनैरशुचिः स्नानशुद्धाः सपिंडाः॥ अंत्ये मासद्वये तु त्रिदिनमशुचयोऽतः परं सूतिवत्स्याज्जातुर्वर्ण्ये स्यात्तुल्यं भवति वयसि यश्चो‍(?) अते शौचमात्रं॥२॥

षण्मासपर्यंतं दृष्टव्यं आद्यमासत्रये त्रिरात्रमेव मातुः सपिंडानां तु नाशौचं। तथा मरीचिः। गर्भस्रुतौ यथामासमचिरे तूत्तमे त्रयहमिति। अचिरे आद्यमासत्रये उत्तमे ब्राह्मणजातौ त्र्यो दिवसाः। तथा च स्मृत्यंतरे पि। स्रावे मातुस्त्रिरात्रं स्यात्सपिंडाशौचवर्जितमिति। एवं मातुराशौचमभिधाय सपिंडानामाह। स्नानशुद्धाः सपिंडाः। सपिंडाः स्नानेन शुद्धाः स्युरिति। सद्यः शौचं सपिंडानां गर्भस्य पतने सतीति स्मरणात्। एवं सपिंडानां चतुर्थमासादित्रये विशेषेण सद्यः शौचे प्राप्ते पंचमषष्ठयोर्विशेषमाह। अंत्यमिति। अंत्ये मासद्वये षष्ठमासानां मध्ये यदंत्यं मासद्वयं पंचमषष्ठाख्यं तत्र सपिंडास्त्रिदिनमशुचयः स्युरिति संबंधः। तथा च स्मृतिः। पाते मातुर्यथामासं पित्रादीनां दिनत्रयमिति वचनात्। अत्र पातशब्दः पंचमषष्ठमासोपलक्षणपरः। पातः पंचमषष्ठयोरिति वचनाच्चेति। स्रावः। अतः परं षण्मासादूर्ध्वं सप्तमाष्टममासयोः सूतिवत् ... जातिवत्। प्रसवनिमित्तं दशाहं नान्यनिमित्तमिति

अशौचतुरीदुबन्धावः २

एवं १ तत्प्राक् ५ दशनजननतो २

त्रिं० स० कालविशेषेण दशाहाद्याशौचापवादमभिधाय वयोवस्थाविशेषाद् अपि तद् … पदर्शनेनाह। स्नानमिति। नामतः प्राक् नामकरणात् पूर्वं परेते

२ उपरते स्नानमात्रेण तत्र निमित्ताशौचमिति प्राक् नामकरणात् सद्यः शौचमिति शंखस्मरणात्। नामकरणादूर्ध्वं दंतजननादर्वाक् परेते अग्नि प्रेतर

दग्धेऽह्नः एकरात्रं अहस्तु दत्तकन्यासु बालेषु च विशोधनमिति वचनात्। अदग्धे तु सद्यः शुचिः स्नानमात्रं। आदंतजन्मनः सद्य इति व ना ३

चनात्। तदुपरि दिनमात्र्यकृतचौलसूनौ तदुपरि दंतजननादूर्ध्वं यावत्त्रिवर्षं चूडाकर्मरहिते परेते दिनमेकरात्रं आचूडान्नैशिकी स्मृतेति व

चनात्। कृते चौले त्रिरात्रमित्याह। सच्चौले तु त्रिरात्रमिति। सच्चौले कृतचौले परेते त्रिरात्रं। निवृत्ते चूडाकानां तु त्रिरात्रा शुद्धिरिष्यत इति म

यावदुपनय नं तावत् ६ नुवचनात्। वर्षत्रयानंतरं … त्रिरात्रमित्याह। त्रिदिनमितरयोः आव्रततात् इतरयोः अकृतचौले अपि शब्दात् कृतचौले पि संस्थिते तत

दुपरि वर्षत्रयादूर्ध्वं … पनयनं त्रिरात्रमेवाशौचं अयमर्थः। प्रथमादकृतचौलस्य यावदुपनयनं त्रिरात्रं वर्षत्रयादूर्ध्वं … यावदुप न यादूर्ध्वं मृते ३

ज्ञाते दशौ चेत् २ स्नानं प्राङ्नामतो वा दशनजननतो अह्नः परेते अग्निदग्धे अदग्धे वा अपि सद्यस्तदुपरि दिनमा अब्दात् अचौलसूनौ ॥

सच्चौले तु त्रिरात्रं त्रिदिनमितरयोः आव्रतात् जातयशौचं मातापित्रोस्तु पुत्रे त्रिदिनमदशने सन्निधौ नष्टचेष्टे ॥ ३ ॥

नयनं त्रिरात्रमिति। त्रिरात्रमाव्रतादेशादिति वचनात्। एवं वयोवस्थाविशेषेणाशौचविशेषमभिधाय जाताशौचमाह। जाताशौचमिति तत

दुपरि उपनयनानंतरं जाताशौचं दशाहादिकं इति यावत्। दशरात्रमतः परमिति वचनात्। एवमविशेषेणाजातदंतमरणे मातापित्रोरपि सद्यः शौ

त ४ चादि प्राप्तौ तदपवादमाह। मातापित्रोस्तु पुत्रे इत्यादिना। अदशने अजातदंते परेते मातापित्रोस्तु त्रिरात्रमेव न सद्यः शौचादि बालानां अजा

तदंतानां यदि … कश्यप स्मरणात्। वैजिकादभिसंबंधादनुरुध्यादघं त्र्यहमिति स्मृत्यंतरात्। एतत् स्नानं प्राङ्नामतो वा दशनजननतो अह सर्वं २

परते २ रित्यादिकं पूर्वोक्तं सर्वं सन्निधौ शिशुमरणे वेदितव्यमित्याह। सन्निधौ नष्टचेष्टे इति सन्निधौ समीपे नष्टचेष्टे नष्टा चेष्टा यस्य मृत इति

यावत्। असन्निधाने शिशुमरणे एतदतिक्रांताशौचं न भवतीति भावः। तदुक्तं व्याघ्रपादमुनिना। उपनीते तु विषमं तस्मिन्नेवातिकालजमिति ॥ ३ ॥

मासादि तानां अव स्थाकुमारा दि १

मरणं
विशेषोपरति निमित्तमपि चातुर्वर्ण्यसाधारणमित्याह। वयसि यदिति। यद्वयसि वयो विशेषोपरति निमित्तमाशौचमात्रं व
र्णविशेषो पादानरहितत्वेन विहितमाशौचं तदपि चातुर्वर्ण्यस्य तुल्यं भवति। तदुक्तं आश्वलायनमुनिना। तुल्यं वयसि सर्वेषामतिक्रांते तथैव चेति।

जन्मेति ४ अत्र स्वगुरुषनिहितत्वइत्यनेन परपुरुषनिहिते जननी अतिरिक्तानामाशौचाभावो ध्वनितः॥१॥ इदानीं पूर्णप्रसवनिमित्तमाशौचं द्विती
यवृत्तेनाह। जन्माशौचांतराले जन्माशौचमध्ये नालवृ र्द्धकाले नालछेदनानंतरं यदि शिशोर्निशनं उपरमः स्यात्। अथवा निप्राणः

जन्माशौचांतराले यदि शिशुनशनं नालवृद्ध्यूर्द्धकाले निःप्राणो निःपतेद्वा जननजनितमाशौचमस्यैव कृत्स्नं॥ प्राङ्नालछेदनाच्चेन्निधनमुपगतस्तद्गृहे णैव शुद्धिः सर्वेषां सूतिकायास्त्विहैव सकलं प्रेतशुद्धिस्तु सद्यः॥२॥

प्राणरहितो निःपतेन्निर्गच्छेत् तदा जननजनितं जननमित्तं कृत्स्नं संपूर्णमाशौचमस्यैव न शावाशौचेन जननाशौचनिवृत्तिः
किंतु जन्माशौचेनैव शिशूपरमनिमित्ताशौचनिवृत्तिरिति भावः। तदुक्तं बृहन्मनुना। दशाहभ्यंतरे बाले प्रमीते तस्यबांध
वैः। शावाशौचं न कर्तव्यं सूत्याशौचं विधीयत इति। चेद्यदि जननानंतरं नालछेदात्प्राक् निधनमुपगतस्तर्हि सर्वेषां पित्रादी
नां त्र्यहेणैव शुद्धिः स्यादिति शेषः। इह विषये सूतिकायाः मातुः सकलं पूर्णं प्रसवनिमित्तं शावशुद्धिस्तु सद्यः प्रसवनिमित्तं नैव भ
वति न शावमिति भावः। जीवन्जातो यदि मृतो मृत सूतक एव तु। सूतकं सकलं मातुः पित्रादीनां त्रिरात्रकमिति वचनात् यावन्न छिद्यते नालः
तावन्नाप्नोति सूतकं। छिन्ने नाले ततः पश्चात्सूतकं तु विधीयत इति वचनात्॥२॥ ॥ ॥ ॥ ॥

त्रिं·स·

चतुर्वर्णसाधारणीं शुद्धिमुक्त्वावर्णविशेषेणादशाह शौचापवादं पंचमहत्वपूर्वार्द्धेनाह। जन्मनिजननाशौचे

३ उपेतउपनीतः कृतयज्ञोपवीतस्तस्यमृत्युउपेतमृत्यु तस्मिन्नन्यौपेतमृ सौउपनीतादिमरणे ब्राह्मणाद्याश्चत्वारो वर्णाः क्रमेण पक्षादह्यमितिक्रमेणैवद्धः

दशद्वादशनिशादिकालं प्रमुच यः स्युः ब्राह्मणोदशाहं क्षत्रियो द्वादशाहं वैश्यः पंचदशाहं शूद्रोमासं द्विजशुश्रूषादिविहितक तत्कृतुनाक

र्मानुष्ठानशीलः शूद्रः पंचदशाहमेवनमासं। क्षत्रस्यद्वादशाहानि विशः पंचदशैवतु। त्रिंशद्दिनानि शूद्रस्य तदर्द्धन्यायवर्तिनइति यतः ३

वचनात्। इदानीमुत्तरार्द्धेन कुलसंबंधिपुरुषविशेषे परमेदशाहाद्याशौचापवादमाह। कुलजेवानप्रस्थेयतौ यामिति

जन्मन्यौपेतमृत्यावपिचदशनिशाद्वादशाहानिपक्षं मासं वर्णाः क्रमेणशुचयेउच्चितकृतं शुद्धातिस्तुपक्षं॥

वानप्रस्थेयतौचौपरमतिकुलजेषंढकेचाप्लवः स्याद्योपिंडोविप्रगुरुश्चैमृतवतिचदिनं शुद्धविद्धैचेसद्यः॥५॥

यतौ चतुर्थाश्रमिणि ४ षंढकेक्लीवेचोपरमतिसंस्थितेउपरते आप्लवः स्नानमात्रं शुद्धिकारणमितियावत्। योपिंडोविप्रगुरुश्चैमृतवतिदिनमहोरात्रमाशौ तद्दसाणाद्य

चंशुद्धविद्धैसद्यः स्नानमात्रं शुद्धिः स्यादितिपूर्वेणसंबंधः। शुद्धचातेकालांतरमृ तेतु दिनमेव शुद्धिहेतुः। ब्राह्मणार्थेविपन्ना

येयोषितंगोग्रहेपिवा। आहवेषुहतानां वैएकरात्रमशौचकमितिस्मृतेः। उपतैराहवेशस्त्रैः क्षात्रधर्महतस्य च। सद्यः संति

ष्ठते यज्ञस्तथाशौचमितिस्थितिरितिमनुस्मरणात् ॥५॥

तत्राद्यार्द्धपद१ त्रिवप लेपतलके२ मिति२

अथ चतुर्थं वृत्तमाह। स्यायमर्थः। जन्मत ऊर्ध्वं ऊनद्व्यब्दे अपूर्णे द्विवर्षे संज्ञे गतसंस्थे उपरते(मृत) इति यावत्। जनिकरः पिता जननी माता स
होदरा भ्रातरः एषां दशाहमाशौचमभिषेकः प्रत्तः। गर्भस्थे प्रेते मातुर्दशाहं जाते उभयोः कृते नाम्नि सोदराणां पैंग्यवचनात्। पद्यांतर
माह। यद्वेति। अथवा पित्रादित्रयस्य त्रिरात्रमाशौचं स्पृश्यत्वमेवाधिकं कर्मानधिकारित्व लक्षणं त्रिरात्रं सपिंडैः सह समानमि
ति भावः। एतच्च पक्षद्वयं त्रिरात्रं दशरात्रं शावमाशौचमभिप्रेत्य ऊनद्विवर्षे उभयोः सूतकं मातुरेव हीनेतद्व्याख्याने विज्ञानेश्वराचा स्त्रीपि
र्यैः स्पष्टीकृतं। अथोत्तरार्द्धेन स्त्रीपु वयोवस्थाविशेषात् आशौचविशेषमाचिः करोति। नामकरणादूर्ध्वं चौरकालादर्वाक् यावत्
चौरकाले स्त्रीपु कन्यासु मृतासु त्रिपुरुषविषये यावत्त्रिपुरुषं ये ज्ञातिः सः स्नानमात्रेण शुध्येत्। अत्र त्रिपुरुषमित्यनेन कन्यानां सा

ऊनद्व्यब्दे संस्थे जनिकरजननीसोदराणां दशाहं यद्वा स्पृश्यत्वमेवाधिकमिह विषये सूतकं तु त्रिरात्रं ॥
स्त्रीपु स्नानेन शुध्येत्त्रिपुरुषविषये ज्ञातिरा ऽऽचौरकालादर्वाग्वाग्दानतोऽह्ना त्रिभिरुपयमनाद्भर्तृगोत्रं स्वकं च ॥४॥

कन्यानं ४ पिंडं यत्त्रिपुरुषं अप्रत्तानां तु स्त्रीणां त्रिपुरुषं विज्ञायत इति वशिष्ठोक्तमभिमतं एतच्च सद्यः शौचं। अचूडायां तु कन्यायां सद्यः शौचं वि
धीयत इत्यापस्तंबेनोक्तं ज्ञेयं। वाग्दानतो वा कू प्रथमं चूडाकरणानंतरं अह्ना एकेनैव दिवसेन ज्ञातिः शुध्येदिति पूर्वेणास्वं यः। अहस्त्व
दत्तकन्यासु बालेषु च विशोधनमिति स्मरणात्। त्रिभिरुपयमनादिति वाग्दानादूर्ध्वं उपयमनं विवाहादर्वाक् भर्तृगोत्रं परिणेतृ
गोत्रं स्वकं पितृगोत्रं च त्रिभिर्दिनैः शुध्येत् इयं शुद्धिः। स्त्रीणामसंस्कृतानां तु त्र्यहात् शुध्यंति बांधवाः। यथोक्तेनैव कालेन शुध्यंति
तु सनाभय इति ॥४॥

ततत्कार्ये तुल्यं वयः सखस्य समानत्वात् तत्त्वं वचनं तिथ्यो
कालेऽस्मत्तिसांति

त्रिं·स· तत्। ध्याशौचं समानं सर्ववर्णसाधारणमित्यर्थः। प्रोषितेकालशेषः स्याद् दशाहमध्ये । सर्वेषां वत्सरे पूर्णे प्रेते दत्वोदकं शुचिरिति वचनात् दवचना
४ दि। एवं स्वकुले सञ्जन्मतानामाशौचमुक्त्वा कुलान्तराश्रितानाम पितृमातामहाशौचमाह। सप्तमादिति त्रिभिर्वृत्तैः। पित्रोर्गेहे समूढा प्रस पित्रोरि
सम्यगूढा वमरणयोः परिणीता याः पेप्रसवमरणतयोः पित्रादिकानामेकरात्रत्रिरात्रे स्यातां यद्यपि पितृगेहे परिणीता कन्या प्रसूता मृता वा भ
याः३ वति तदा तस्याः पित्रादिकानां क्रमादेकरात्रत्रिरात्रे प्रसवे एकरात्रं मरणे त्रिरात्रमित्यर्थः। अत्र पित्रोर्गेहे इत्यनेन भर्तृगेहे प्रसूतायां मृतायां
वा पितृप्रत्यासर्वेषामाशौचाभावो दर्शितः। तथा च विष्णुवचनं। संस्कृतासु स्त्रीषु नाशौचं पितृपक्षे तत्प्रसवमरणे चेत्पितृगेहे
७प्रय५ स्यातां तदैकरात्रं त्रिरात्रं चेति। पितृमरणे ऊढपुत्र्याः त्रिरात्रमित्यसजातीयशब्देन पूर्वोत्तरसूचना ऊढपुत्र्याः परिणीतकन्यायाः
पितृमरणे माता पित्रोर्मरणे त्रिरात्रं पित्रोरुपरमे स्त्रीणां मूढानां तु कथं भवेत्। त्रिरात्रेणैव शुद्धिः स्यादित्याह भगवान् यम इति तद्

पित्रोर्गेहे समूढाप्रसवमरणयोरेकरात्रत्रिरात्रे स्यातां पित्रादिकानां मध्ये पितृमरणे ऊढपुत्र्यास्त्रिरात्रं॥
प्रेते धाचार्यमातामहदुहितृसुतश्रोत्रियर्त्विक्सयाज्यस्वस्त्रीयेषु त्रिरात्रं त्रिदिवसं मस्तुचिः सोदकस्तूमयत्र॥७॥

याज्ञवल्क्यस्मरणात्। प्रेते धाचार्य मातामहदुहितृसुतश्रोत्रियर्त्विक्सयाज्यस्वस्त्रीयेषु त्रिरात्रं उपनयनपूर्वकं वेदाध्यापकः प्राचा
र्यः। एकशाखाध्ययनक्षमः श्रोत्रियः। ऋत्विक् प्राप्तयवादियज्ञकर्मकर्त्ता स एव स याज्यः यजमानसहितः। शेषाः प्रसिद्धाः एते
म्तेपु४ षु त्रिरात्रं सोदकस्तूभयत्रेति। समानोदकः सप्तपुरुषानन्तरं सप्तपुरुषावसानः उभयत्र जाताशौचे मृताशौचे च त्रि
दिवसमेवाशुचिरशुद्धः स्यात्। तथा बृहस्पतिः। अहं मातामहाचार्यश्रोत्रियेष्वशुचिर्भवेत्। प्रचेताश्च। मृते चर्त्विजि याज्ये च त्रिरा
त्रेण विशुध्यतीति। वृद्धयाज्ञवल्क्योऽपि। संस्थिते पक्षिणीरात्रिं दौहित्रे भगिनीसुते। संस्कृते तु त्रिरात्रं स्यादेवं धर्मो व्यवस्थित
इति। मनुरपि। जन्मन्येकोदकानां तु त्रिरात्राच्छुद्धिरिष्यते। शवस्पर्शो विशुद्ध्यंति त्र्यहात्तूदकदायिन इति॥७॥ ॥ ॥

सापिंडं सप्तमावधिः। सोदकं द्वादशावधिः४ एकशाखाध्यापकः श्रोत्रियः६ सोपनीतेर

अतिक्रांते२ शौचं२ देशकालादिभेदेन१

एतच्च ज्ञातमेवाशुद्धिशुद्धिनिमित्तमिति निर्णीतं वृद्धैस्तथा च ज्ञानानंतरमुत्सर्गतो दशाहादिप्राप्तौ कंचिदपवादमाह षं
ढत्वेन शावैरिति। शावे शावाशौचे दशाहाभ्यन्तरे विषये के प्रतीते दशदिनानंतरं ज्ञातइति यावत् विषयकइति देशे
तीते२ यस्मिन्देशे मृतिः तत्रैव ज्ञाते त्रिमासात्प्राक् त्रिमासात्प्रथममासत्रये त्रिरात्रं त्रिमासानंतरं आषण्मासात् षण्मासंयावत्
पक्षिणी पूर्वापरदिनाभ्यां युक्ता रात्रिः शुद्धिनिमित्तं इति। षण्मासादूर्ध्वं यावन्नवममासपर्यंतं दिनमहोरात्रं स्यात्। ततो न
नवममासा१ दूर्ध्वं स्नानमात्रं स्यादिति सर्वं च। देशांतरमृतिश्रवणे विशेषेण त्रिमासादावपि स्नानमेवेत्याह। स्नानं देशांतरस्थइति मास
त्रये त्रिरात्रं स्यात्षण्मासे पक्षिणी तथा। अहस्तु नवमादर्वाक् ऊर्ध्वं स्नानेन शुध्यतीति वृद्धवसिष्ठवचनात्। देशांतरमृतं श्रु

शावैर्तीते दशाहाभ्यन्तरे विषयके प्राक् त्रिमासात्त्रिरात्रं पक्षिण्याषण्मासाद्दिनमिदं नवमात्स्यात्ततः स्नानमात्रं॥
स्नानं देशांतरस्थे तथापितृविषये देशकाल। विशेषात्सर्वं सर्वं मातुः सपत्न्याश्च दिनमिदं मतिकांतशौचं समानं॥ दे
शांतरीविवेचनानस्येति। मृते स्नानेन शुध्यंति गर्भस्राव च गोत्रिण इति स्मृत्यंतरात्। देशांतरलक्षणमाह। बृहस्पतिः। महानद्यंतरं
यत्र गिरिर्वा व्यवधायकः। वाचो यत्र विभिद्यंते तद्देशांतरमुच्यते। देशांतरं वदंत्येके षष्टियोजनमायतं। चत्वारिंशद्वदंत्यन्ये त्रिंशदन्ये
तथैव चेति। एतस्याप्यपवादमाह। अपि पितृविषयइति। देशकालविशेषात्सर्वदेशे सर्वकाले
च पितुर्मातुश्च मरणे सुतानां सर्वं सर्वं जाति विहितं दशाहादिकमेव पितृविषये सत्र पिता च माता च पितरौ च मृतौ स्यातां दूरस्थो
हि२ पि पुत्रकः श्रुत्वा तद्दिनमारभ्य दशाहं सूतकी भवेदिति वचनात्। अपरमातुर्विशेषमाह। मातुः सपत्न्याश्च दिनमिति। अपरमात
रि मृतायां पुत्रस्य देशकालविशेषेण नवममासादूर्ध्वं त्रिरात्रं तदुक्तं। पितृपत्न्यामपेतायां मातृवर्ज्यं द्विजोत्तम। संवत्सरमतीतेतु त्रि
नैव विषयो यस्येति समासः तथा च दि

शिष्येति १ तत्कार्यं २

त्रिं० स० ऽप्रवचनवमंतं । एकदेशाध्याप [illegible] उपाध्यायः ॥ अनूचानाग । चतुर्दशपुरुषादूर्ध्वं सप्तपुरुषावसानः सगोत्रः तुल्यः
५ छः । एतेषु शिष्यादिषु प्रमीतेषु एकरात्रं । अहोरात्रमाशौचमिति शेषः । तथा स्वगृहे परमृते मातुले च एकरात्रं । तथा सब्रह्मचारि
णि चैकरात्रं । एकं च योपनीतः सब्रह्मचारी । तस्मिन्मृते रात्रिमहोरात्रमाशौचमिति । गुर्वंतेवास्यनूचान श्रो त्रियेषु मृतेषु चेति
याज्ञवल्क्यस्मरणात् । बंधुत्रयग्रहणे नाल्वंध्यवः पितृबंधवो मातृबंधव श्चोपलक्ष्यंत इति विज्ञानेश्वराचार्यैर्व्याख्यातत्वात् ।
त्रिरात्रमाहुराशौचमाचार्ये संस्थिते सति । तस्य पुत्रे च पत्न्यां च दिवारात्रमिति स्थितिरिति मनुस्मरणात् । भेकोदकानां तु त्र्यहं । त्र्यह ५
जावालि त्रजानामहः स्मृतमिति याज्ञवल्क्यवचनात् । प्रसंगेषु स्ववेश्मनि मृते त्वेकरात्रमिति विष्णुस्मरणात् । अत्र येषां पुनर्ग्रहणं तेषा

एकगुरूपनीतस शिष्योपाध्यायबंधुत्रयगुरुतनया चार्यभार्यासगोत्रानूचानश्रोत्रियेषु स्वगृहे परमृतौ मातुले चैकरात्रं ॥
ब्रह्मचारि ८ रात्रं सब्रह्मचारिण्येवं तु कथमपि स्वल्पसंबंधयुक्ते स्नानं वासोयुतं स्यादिदमपि सकलं सर्ववर्णेषु तुल्यं ॥ ए ॥

तिथ्याख्ये मसंनिधानादेवा व्यवस्था द्रष्टव्या । श्रोत्रियस्य समानग्रामीणस्य [illegible] पं । एकाहं सब्रह्मचारिणि समानग्रामीणे [illegible] साश्व श्रोत्रियः ५
पं ५ लायनवचनात् । अथ कथमपि स्वल्पसंबंधयुक्ते स्नानं वासोयुतं स्यादि । अत्रापशब्दो धिकारांतः सूचयतेऽर्थः । कथमपि केनापि प्रकारेण
स्वल्पेनापि संबंधेन संबंधिनि भगिन्यादौ संस्थिते वासोयुतं सचैलं स्नानं शुद्धै स्यादिति । सचैलस्नानाच्छुद्धिरिति भावः ।
तदुक्तं याज्ञवल्क्यमुनिना । भगिन्यां संस्कृतायां तु भ्रातर्यपि च संस्कृते । मित्रे जामातरि प्रेते दौहित्रे भगिनीसुते । श्यालके
तत्सुते चैव सद्यः स्नानेन शुध्यतीति । इदमप्युक्तं । सकलमाशौचं सर्ववर्णेषु तुल्यं साधारणं स्पष्टं ॥ ए ॥ ॥

स्नानं ३

पक्षिण्याशौचमिति १ मतग्रामनापेन्चम्नते ३ मातुलपत्न्यां २

वदेशाधि
तौ ३

अथाष्टमवृत्तं । ऋत्विगादयो भागिनेयांताः प्रसिद्धाः तेषां प्रयाणे मृत्यावित्ति यावत् । मातामह्यां च विरतायां पित्रोः स्वस माशौच २
रि मातृष्वसरि पितृष्वसरि च विरतायां मातुले च विरते मातुलान्यां विरतायां पक्षिण्याशौचं कारणं । अथ सज्योतिरि
ति । स्वविषयनृपतौ नष्टे सज्योतिरेव कालः शुद्धिहेतुः । समानं ज्योतिरादित्यो नक्षत्रं वा यस्मिन् सज्योतिर्दिवा नष्टे याव
त्सूर्यदर्शनमशुचिः न नक्षत्रदर्शनाच्छुद्धिः रात्रिनष्टे तु रात्र्यवसानपर्यंतमेवाशुद्धिरिसर्थः । अत्र येषां पूर्वं दृष्टे त्रिरात्रमु सूर्यदर्शना शुद्धिः
क्तं तेषां पुनः पक्षिणीकथनं देशकालादिभेदतो व्यवस्थापनीयं । एतस्य पक्षिण्यभिधानस्य श्वशुरयोश्च भगिन्यां मा

पक्षिण्याशौचं मृते ऋत्विग्दुहितृसुतसहाध्यायिवं धुत्रयांतेवासिश्वश्रूसुमित्रश्वसुरभगिनिकाभागिने
यप्रयाणे ॥ मातामह्यां च पित्रोः स्वसरि च विरते मातुले मातुलान्यां चैषां सज्योतिरेव स्वविषयनृपतौ ग्रामनायेव

तुलान्यां च मातुले पित्रोः स्वसरि तु द्वयं पक्षिणीयेष्टे येन्निर्श्री तथा मातुले श्वसुरे मित्रे गुरौ गुर्वगनासुत । अशौ
चं पक्षिणीरात्रिं मृता मातामहीयदीति तथा पाक्षिणीं सपिंडे यो निवंधे सहाध्यायिनि चेत्यादिवचनानि मूलं । अथ सज्योति
रेवसत्रे । प्रेते राजनि सज्योति र्यस्य स्याद्विषये स्थितिरिति मनुवचनं । ग्रामेश्वरे कुलपतौ श्रोत्रिये वा तपस्विनि ॥ शि
ष्ये पंचत्वमापन्ने शुद्धिर्नक्षत्रदर्शनादिति वृद्धयाज्ञवचनं मूलं ॥ ८ ॥ ॥ ॥ ॥ ॥

...८

ततत्कार्यं घिटि

६ अथैकादशाहन्तं। सर्वमिदमाशौचं यद्याशौचांतमध्ये एव विदितं स्यात् भवतितदाशेषमात्रेण शुद्धिः। दशाहमध्ये यान्यवशि

ष्टानि दिनानितावन्मात्रेणशुद्धिः। नैतावता दिनादारभ्य [illegible] त्यर्थः [illegible]। एवं त्रिदिनाद्याशौचेपिद्रष्टव्यं। प्रोषितेका

लशेषस्स्यादिति याज्ञवल्क्यस्मरणात्। दशाहादाहिताग्नौ। इदमाशौचं आहिताग्नौ साग्निके मृते। दाहादाहदिवसतो दशादि

पुन ४ नं कुर्यात्। नमरणदिवसत इति। अन्यस्मानाहिताग्नौ मरणदिवसतः कुर्यान्नदाहदिवसादित्यर्थः। अनग्निमत उत्क्रांते नरा।४

साग्नेः संस्कारकर्मणः। शुद्धिसंचयनंदाहान्मृताहस्तु यथातिथि इत्यंगिरोवचनात्। आशौचांते यत्स्नानात् शुद्धिर्भवतितदा

6

सर्वं तदाशौचमंतर्यदि विदितमिदंशेषमात्रेणशुद्धिं दाहाद्दाहिताग्नौ मरणदिवसतो ऽन्यत्र कुर्याद्दशाहं।

पूर्णेस्नातासचैलं विहितहितकृतौ दैवके वा सूतिकातु त्रिंशद्रात्रेणयोग्या पितृसुरकरणे विंशतिं पुत्रसूस्तु॥११॥

हं पूर्णेस्नातेति। पूर्णे आशौचे सचैलं सवस्त्रं यथा भवतितथा स्नाता विहितहितकृतौ दैवकार्ये पितृकार्ये च अर्हकाः यो वेदोक्तस्व

ग्याः स्युरितीत्यर्थः इति शेषः। सूतिकायाविशेषमाह। सूतिकात्विति। सूतिकातुपुनः त्रिंशद्रात्रं मासमात्रे पितृकरणे पितृकार्ये धिकारके

नर सुरकरणे देवकार्ये योग्याशुद्धानभवती त्यर्थः। एतत्कंन्याप्रसवे पुत्रप्रसवेविशेषमाह। पुत्रजननी विंश[illegible]दुरात्र विंशतिपुत्र

शुभयकार्ये योग्यानौ। सूति कां पुत्रवतीविंशतिरात्रेणकर्माणिकारयेत्। मासेन स्त्रीजननी इति पैठीनसिवचनात्। स्नतिर

भवतीसेवान्वयः १ [illegible] ॥११॥

विशद्धिःपुत्र [illegible] कन्यासू [illegible] मनिस्मरणात्

इदानीमाशौचमध्ये प्राप्ताशौचान्तरसंनिपाते दशमवृत्तेन प्राह ॥ अस्यायमर्थः वृद्धाशौचस्य मध्ये प्रवृत्ताशौचमध्ये तु पुनर्यदि प्र
परमपि अन्यदपि समं दशाहाशौचमध्ये दशाहमाशौचं वा स्वल्पकं वा त्रिरात्रादिकमाशौचं सजातिसमानजातीयं जाताशौच

स्य मध्ये जाताशौचं प्रेताशौचस्य मध्ये प्रेताशौचं भवति । तदा पूर्वशेषेण शुद्धिः । समं स्वल्पकं चेत्यनेन स्वल्पाशौचस्य मध्ये पतितस्य दी
र्घाशौचस्य न पूर्वेण शुद्धिरिति वेदितव्यं । तदुक्तं उशनसा । स्वल्पाशौचस्य मध्ये तु दीर्घाशौचं भवेद्यदि । न पूर्वेण विशुद्धिः स्यात्कालेनैव शु
ध्यतीति । तथा च प्रेते प्रेताशौचमध्ये तु जात्यंतरसजातीयं शौचं जननाशौचं भवति तदा पूर्वेण मृताशौचेनैव शुद्धिः । एतेन जाताशौचमध्ये
जातस्य प्रेताशौचस्य न पूर्वेण शुद्धिरिति ज्ञापितं । शावेन शुध्यते सूतिर्न सूतिः शावशोधनीति स्मरणात् । द्वाभ्यां तदूर्ध्वविशेषेरा .

वृद्धाशौचस्य मध्येवं परमपि समं स्वल्पकं वा सजाति प्रेते जात्यंतरं यदि भवाति तदा पूर्वशेषेण शुद्धिः ॥
द्वाभ्यां तदूर्ध्वविशेषे त्रिभिरपरदिने यामिनी यामशेषे नैवाशौचेन पित्रोः पितुरुपशमने पक्षिणी मातृमृत्यौ ॥ १० ॥

यामः तुरीयः प्रहर शेषे ५
त्रिमात्रावशेषे यद्याशौचान्तरं पूर्वोक्तं भवेत्तदा द्वाभ्याम परदिनाभ्यामाशुद्धिस्त्रिभिरपरदिने यामिनी यामशेषे तु रात्रि । यामिन्याः स्तुरी
यः प्रहरः तन्मात्रावशेषे त्रिभिरपरदिनैः पूर्वाशौचाधिक त्रिभिर्दिवसैः शुद्धिः न पूर्वाशौचशेषमात्रेणेति । रात्रिशेषे सति द्वाभ्यां
प्रभाते तिसृभिः स्नातेति गौतमवचनात् पित्रोर्विशेषमाह । नैवाशौचेन पित्रोः मातृपितृसंबंधिनाशौचं पूर्वाशौ
चशेषेण किंतु पितुरुपरमे मातुर्वाउपरमेत दशाहमेवाशुद्धिरितिभावः । तयोर्मातृपितृविरतिनि परस्परसंनिपातेन पूर्वाशौचशेषेण
शुद्धिः शुद्ध्येतां मात्राशौचमध्यपतितस्य पित्राशौचस्य न संकोचः । मातुर्विशेषमाह । पितुरुपशमने ति । पितुरुपरमने पित्रा
नष्टुद्धेर २ शौचमध्ये मातृमृत्यौ मातापित्रोः पक्षिणी अधिकानैकार्या यावद्दशाहमिति भावः । तथा च स्मृतिः । मातर्यग्रे प्रमीतायामशुद्धौ म्रियते पिता । पितुः शेषेण

किंतु नसाने ५ उत्तर दिवस पक्षिणी म ... तिः अन्याशौचस्य मध्ये पतितं यत्पित्रो ४ पक्षिणी मरस्याव

ततत्कार्यं इति ब्राह्मणानुगमनवत्

त्रिं॰स॰ एवं निर्हरणशौचमुक्त्वा अनुगमनाशौचं त्रयोदशवृत्तेनाह। तुल्योत्कृष्टानुयाने ब्राह्मणस्य ब्राह्मणानुगमने। एवं क्षत्रियादेः
स्वस्ववर्णानुगमनं तुल्यानुयानं। उत्कृष्टानुयानं तु क्षत्रियस्य ब्राह्मणानुयानं। तथा वैश्यस्य क्षत्रियानुगमनं। शूद्रस्य ब्रा तथा
७ ह्मणक्षत्रियवैश्यानुगमनं तत्र तु तुल्योत्कृष्टानुयाने कृते वसनसहितकः सवस्त्रः अंभसि नद्यादावाप्लुत्य स्नात्वा वह्निं
स्पृष्ट्वा आज्यं प्राश्य विशुध्येत्। प्रसिद्धमेतद्वाक्यार्थकथनं। तत्र चानुगम्येच्छया प्रेतं ज्ञातिमज्ञातिमेव वा। स्नात्वा सचैलः स्पृ
ष्ट्वाग्निं घृतं प्राश्य विशुध्यति। इति मनुवचनं मूलं। हीनानुगमनाशौचमाह। अथ दिनमशुचिरिति। हीनवर्णानुयाने ब्राह्म

तुल्योत्कृष्टानुयाने वसनसहितकोऽम्भस्यथाप्लुत्य वह्निं स्पृष्ट्वाज्यं प्राश्य शुध्येद्दिनमशुचिर्हीनवर्णानु
याने। पक्षिण्येकांतरानुव्रजन इह भवेद्व्यंतरत्वे त्रिरात्रं कृत्वा स्नात्वा सुनद्यां असुयमनशतं सर्पिरा शं च कुर्युः॥१३॥

णस्य क्षत्रियानुगमने क्षत्रियस्य वैश्यानुगमने वैश्यस्य शूद्रानुगमने। क्षत्रियाद्यनुगंता ब्राह्मणादि दिनमहोरात्रमशुचि
तिशेषः२ र्भवेत्। पक्षिण्येकांतरेति। एकांतरानुव्रजने ब्राह्मणस्य वैश्यानुगमने क्षत्रियस्य शूद्रानुगमने पक्षिणीमशुचिर्भवेत्।
द्व्यंतरत्वे ब्राह्मणस्य शूद्रानुगमने त्रिरात्रमनुगंता ब्राह्मणोऽशुचिर्भवेदिति संबंधः। त्रिरात्रानंतरं कृत्यमाह। त्रिरात्रं कृ
त्वानंतरं सुनद्यामुत्तमजले स्नात्वा असुयमनशतं प्राणायामशतं कृत्वा सर्पिराशं घृतप्राशनं कुर्युः। ततः शुद्धा भवंति
सर्वे। तथा च पराशरः। प्रेतीभूतं तु यः शूद्रं ब्राह्मणो ज्ञानदुर्बलः। अनुगच्छेन्नीयमानं स त्रिरात्रेण शुध्यतीति। त्रिरा
त्रे तु ततश्चीर्णे नदीं गत्वा समुद्रगां। प्राणायामशतं कृत्वा घृतं प्राश्य विशुध्यति॥१३॥ ॥ ॥ ॥

कृते सति। तदनंतरं३

।अथ द्वादशं व्याख्यानं। अन्यस्य सवर्णमसपिंडं निर्हृत्य दिवसैः अशुचिको भवति एतदहोरात्रमतद्गृहवासिनो तदन्नभोजिन ज्ञेयं। तद्गृह
वासिन स्त्रिरात्रं तदन्नाशिनस्तु दशरात्रमिति ज्ञेयं। तथा च मनुः। असपिंडं द्विजं प्रेतं विप्रो निर्हृत्य बंधुवत्। विशुध्यति त्रिरात्रेण मा
तुराप्तांश्च बांधवान्। यद्यन्नमत्ति तेषां तु दशाहेनैव शुध्यति। अत्तदन्नमहः न चेत्तस्मिन् गृहे वसेत्। अथ स्ववर्णनिर्हृत्य तदुक्ताशौचः। स इति ३
जातीयस्य निर्हरणं [illegible] । ब्राह्मणः शूद्रं निर्हृत्य सतदा मासमशुचिः। तथा शूद्र प्रेतं ब्राह्मणं तदा दशरात्रमि [illegible] ति ज्ञेयं। अवरश्रे एवं ३
ष्ठानां पूर्ववर्णमुपस्पृशेत्। पूर्वो वा अवरं तत्र दोष माशौचमिति वचनात्। अनिर्हरणे स्पर्शशास्त्राभ्यां प्रेतवहने ज्ञेयं। एतस्यापवादमाह। अथा
नाथमिति। अनाथं प्रेतं निर्हृत्य अश्वक्रतुशतफलभाग्भवेत्। स्नात्वैनैव शुध्येत्। अश्वक्रतुर्ज्योतिष्टोमः। आत्मवः स्नानं एवकारेणास्त तेनैव शुद्धे वत् ८

स्वैउक्तानां शौचं यस्य स

निर्हृत्यान्यं प्रमीतं दिवसमशुचिकोऽथ स्ववर्णं तदुक्ताशौचोऽनाथमाद्यक्रतुशतफलभाग्स्नात्वनैव शुध्येत्॥ न ७
नीतोपाध्यायमातापितृपरमगुरून् ब्रह्मचारी न दोषी तेभ्योऽन्यं निर्हृतोऽस्य व्रतमपि विततं भ्रश्यते वश्यमेव॥१२॥

नोत्तरमाशौचनिवृत्तिः प्रतिपादिता यथाह पराशरः। अनाथं ब्राह्मणं प्रेतं ये वहन्ति द्विजोत्तमाः। पदे पदे यज्ञफलं मनु पूर्वं लभंतिते। न तेषा
मशुभं किंचित्पापं वा शुभकर्मणां। जलावगाहनात्तेषां सद्यः शौचं विधीयत इति। अथ ब्रह्मचारिणो विशेषमाह नीतेति। ब्रह्मचारी न दोषी
नीता ३ उपाध्यायान् निर्हृत्य ब्रह्मचारी न दोषी। ब्रह्मचारी ब्रह्मव्रतात् न भ्रश्यत इति। आचार्यपित्रुपाध्यायान्निर्हृत्यापि व्रती व्रती इति याज्ञवल्क्य
वचनात्। अन्यनिर्हरणे दोषमाह। तेभ्यो न्यमिति। तेभ्योऽउपाध्यायादिभ्योऽन्यं निर्हृत्य स्य ब्रह्मचारिणः विततं विस्तृतं व्रतमपि अवश्यमेव विराजित
भ्रश्यते। ब्रह्मचारिणः सर्वकर्मणां व्रता [illegible] निवृत्तिः। अन्यत्र मातापित्रोरिति [illegible] वशिष्ठवचनादिति [illegible] ॥१२॥ मिति यानं
ब्रह्मचर्यात् च्युतो भवतीत्यर्थः। दोष [illegible]

गोत्रजानां २ ततत्कार्ये स्थिति

॰अत्राशौचशब्देनाशुचित्वमाचिनाऽस्पृश्यत्वस्वरूपा प्रतीतौ जातायां जन्माशौचे तद्भवादं षोडशाहृत्तेनाह। जन्मनेजन्मनिमित्ततो स्पृश्यता कुलभवा सपिंडानां सोदराणां चास्पृश्यतानो भवति। किंतु मातृवर्जं मातुः सूतिकायास्तु अस्पृश्यता भवत्येवेत्यर्थः। पितुर्विशेषमाह। स्नानादूर्ध्वं सचैलादिति। सचैलस्नानादूर्ध्वं पितुरस्पृश्यतानो भवतीति पूर्वेण संबंधः। तथा च संवर्तः। जाते पुत्रे पितुः स्नानं सचैलं तु विधीयते। माता शुद्ध्येद्दशाहेन स्नात्वा तु स्पर्शनं पितुरिति। ॰अंगिराश्च। सूतके सूतिकावर्जं संस्पर्शो न निषिध्यत इति। मृतशौचे ष्यस्पृश्यत्वसंकोचनमाह अथ्येति। निधनकृताशौचके मरणनिमित्ताशौचे अल्ये त्रिरात्रादिके त्रिधा विभक्ते। पूर्वं स्यांशो परिप्रथमं त्रिभागे

जन्मन्यस्पृश्यतानो भवति कुलभवां मातृवर्जं पितुश्च स्नानादूर्ध्वं सचैलादथ निधनकृताशौचकेऽल्पे त्रिभागे॥
पूर्वांशस्योपरिस्थं महति च यदि संचायनं वृत्तमासीन्नो चेत्तस्योपरिष्टादथ तु गृहजयोर्दासयोराप्लवोर्ध्वं॥ १६॥

शादुपरितनभागद्वयं तत्रास्पृश्यतानो भवतीति संबंधः। उपरिस्थं महति च दशाहादिकेपि एवमेव यदि संचायनं। अस्थिसंचयनं प्रथमदिने एव वृत्तमासीत्तदेवायं विभागलक्षणप्रकारः। नो चेत्तद्यदि तु न तत्कृतं स्यात्तर्हि तस्योपरिष्टादस्थिसंचयनानंतरं दिनानि त्रिधा विभज्य प्रथमभागं त्यक्त्वा उत्तरभागद्वये स्पृश्यतानो भवति। पूर्वभागे भवत्येवेति तात्पर्यं। स्पर्शाशौचकालद्वित्वं स्पर्शनं तु विभागतः। शूद्रविट्क्षत्रविप्राणां यथाशास्त्रं प्रणोदितमिति स्मरणात्। तथा दशादि त्रिभागेन कृते संचयने क्रमात्। अंगस्पर्शनमिच्छंति वर्णानां तत्त्वदर्शिनः। त्रिचतुःपंचदशभिः स्पृश्या वर्णाः क्रमेणेति देवलस्मरणात्। अथ तु अथेत्यर्थांतरे गृहजयोः स्वगृहोत्पन्नयोः दासीदासयोराप्लवोर्ध्वं स्नानानंतरमस्पृश्यतानो भवतीति संबंधः॥ १६॥

ताताइति १ उपनीयवेदाध्यापकः १ चापि ५ ७१२ सूतिकान्ने ३

संलग्नते ३ अथचतुर्दशं वृत्तं तातः पिता अंबामाता आचार्यो [illegible] एभ्यो यो ब्रह्मचारी अनलजलतिलान्ददातीति अनलजलतिलदः एवं विधो

ब्रह्मचारी तदीयाशौचो भवति तदीयाशौचमध्ये अशुद्धो भवतीति भावः अन्येभ्यस्तु तद् अनलजलतिलदस्तदीयाशौचः सन् आशौ

पुन ३ चांते पुनरुपनयनं अथिकं कारयेत् ततः शुद्धो भवतीत्यभिसंधिः एतच्चौर्ध्वे पिच्छपाण्यां निर्हत्य पितृतीर्थे संकटेन्नं त्वामीया वचते

महसंविशेत् इसेतद्व्याख्यानमिता द्वारायां स्पष्टीकृतं अन्ये लिति अन्ये ब्रह्मचारिव्यतिरिक्ता अप्रत्तिके ओपि अनलजलतिलान्ददातित

दातस्त्रयुक्ता अशुभाः स्युः तदाशौचेनैवाशौचवंतः स्युरिति तात्पर्यं अधिकं स्मृत्यर्थं कुर्युः ततः शुद्धा भवंतीति भावः अथ धनदहनविधिविधि

यदा अथमदाहकास्तदैतं तमेवाभावं प्राप्नुवंति तेनतेन धनेन तुल्या भवंती सर्वः एतच्चनो त्रमस्तस्य येन्ने चमिसनंतम दोर्निर्गीत १४ अथ पदेशां

पालाशीति ७ तरम्यतस्यशरीरालाभे दाहविधिं पं च दशेन वृत्तेनाह अग्निहिताग्नेः त्रिभिः प्रतिकृतिं कृत्वा तदलाभे शौनकादिग्रन्थोक्तविधिना पालाशीप्र

साग्निकस्या ७ तिकृतिं कृत्वा तां दग्ध्वा जात योदशाहाद्याशौचास्युः ततः तरन्तां अनाहिताग्नीनो पालाशादिप्रतिकृतिं दग्ध्वा जात यस्त्री त्र्यहानि कुर्युः दिन

तातावाचार्यकेभ्यो अनलजलतिलदो ब्रह्मचारी तदीयाशौचान्येभ्यस्तु तद् पुनरुपनयनं वा अधिकं कारयेत् ॥ अन्ये बंत्तातिकेभ्यो यदि

ददतितदात त्र्युक्ताशुभास्युः कुर्युः कृ [illegible] पंचाधमदहनविधौ तं तमेवाप्नुवंति ॥ १४ ॥ पालाशीमाहिताग्नेः प्रतिकृतिं यवास्थीनि

दग्ध्वा दशाहाद्यशौचं जातयः स्युस्ततेऽन्तरन्तप्राणं त्रीण्यहान्येवं कुर्युः अन्ये विप्राद्याशौचे सकृद्दनमदं तावदाशौचकृत्स्याद्यावत्ते

मूलं ९ त्र यमेवाशौचं कुर्युरिति भावः अग्नो भयत्वं वशिष्ठवचनमाहिताग्निश्चे त्प्रवसन् म्रियते पुनः संस्कारं कृत्वा शववदाशौचमिति अनाहिताग्नेस्त्रि

लौकिकाग्नि ना ४ रात्रमिति सुमिष्टे जलसंमिश्रे दग्धव्य अग्नेतथाग्निना असौ स्वर्गाय लोकाय स्वाहेत्युक्त्वा यवं धवैः एवं पर्णशवं दग्ध्वा त्रिरात्रमशुचिर्भवेत् इति च

अन्ये विप्रादीति अन्या विप्राद्यसकुल्यो दशाहाद्याशौचे सकृदेकवार भु [illegible] दन्नभुंजस्तावदेवाशौचकृत्स्यात् नं यावत्कालमाशौचं ताव

दशौचकृ २ दिति यावत्तदंते आशौचांते यस्य यत्कृतं विहितं तत्कृत्यमपि चरेत् कुर्यादु भ दशाहानि कुलस्यान्नं न भुंजत इति निषिद्धाचरणादिति भावः अशे

दनेतकरात्रमिति प्रेतस पिंडैः सहरोदने एकरात्रमहोरात्रमाशौचं तत्स्यादिति [illegible] तया च पारस्करः मृतस्य वा धवैः सार्द्धं कृत्वा तु परिदेवनं शोद १

दत्वै [illegible] अग्नेयं [illegible] त्रं स्नानमाद्यादिकर्म चेति ॥ १५ ॥

त्रिं·स·

येषु १ रो ४ त तत्कार्येष्विति १ स्वर्थः ४।

९ ॰अथ येषु कार्येषु येषां सद्यः शौचं तदभिधानात् कालिकीं शुद्धिं स्मृत्यंतरादष्टादश श्लोकेन कथयति। येषां यानि कार्याणि याजो विकार्यं विहित
नि तेषां तेषु कर्तव्येषु ॰अनन्यसाध्येषु सद्यः शौचं सद्य एव भवतीति पूर्वश्लोकगतेनान्वयः॰ अन्नसत्रिणो ऽन्नसत्र प्रवृत्ताः।
व्रतिनः आरब्ध प्रायश्चित्तलक्षणव्रताः ॰नृपो राज्येऽभिषिक्तः ॰नृपवान् राजसेवकः दीक्षितो यागकर्ता ॰ऋत्विजः कर्मकर्तारः आध्वर्यवादि ३
॰अनेकश्रुतिपठनो बहुवेदशास्त्राध्ययनशीलः ॰आतुरो रोगी। ॰अन्ये तु प्रसिद्धाः। एषां सद्यः शौचं नैव भवती संप्रार्थ्येषु दानादमत

त तत्कार्येषु सत्रिव्रतिनृपनृपवदीक्षितर्त्विक् स्वदेशभ्रंशापन्नानेकश्रुतिपठन् भिषक्कारुशिल्प्यातुराणां॥
संप्रार्थ्येषु दानोपनयनयजन श्राद्धयुद्धप्रतिष्ठा चूडा तीर्थयात्राजप परिणयनाद्युत्सवेष्वेतदर्थं॥१८॥

त्सर्वाः प्रसिद्धाः। एतेषु संप्रार्थ्येषु निःपाद्यमानेषु एतदर्थं एतैः सद्यादिभिः संसाध्यमानकार्ये इति यावत्। एतेषां सद्यः शौ
चं नो भवति इत्यनेनैव संबंधः। तथा च याज्ञवल्क्यवचनं॥ ऋत्विजां दीक्षितानां च यज्ञियं कर्म कुर्वतां। सत्रिव्रतिब्रह्मचारिदा
तृब्रह्मविदां तथा। दाने विवाहे यज्ञे च संग्रामे देशविप्लवे। आपद्यपि च कष्टायां सद्यः शौचं विधीयत इति। कृष्णपदोदभि
त्वाद्याः। तथा प्रचेतो वचनमपि। कारवः शिल्पिनो वैद्या दासीदासास्तथैव च। राजानो राजभृत्याश्च सद्यः शौचं प्रकीर्तिताः॥ १८॥

स्वर्णकारः १ ऋत्विक्मित्तेकार्ये ४ दीक्षितो यजमानः ३

६ दासभेदेनास्पृश्यत्वकालभेदं सप्तदशार्द्धेनाह। अन्नेनोपात्तयोरन्नदानेन गृहीतयोर्दासीदासयोस्तु पुनः त्रिरजनिचरणात्
रात्रित्रयगमनादूर्ध्वं अस्पृश्यतानो भवतीति पूर्वश्लोकगतेनान्वयः। तुशब्देन पूर्वस्मादिशेषद्योतनं दासादिकानां स्वाम्याशौचाहसं
ख्यासमदिनगमनादूर्ध्वं अस्पृश्यतानो भवतीति चान्वयः। आदिशब्देन द्रव्यादिक्रीतानां संग्रहः स्वामिनो यावन्त्याशौचदिनानि तेषां संख्यया
समदिनानामतिक्रमणादूर्ध्वं मित्यर्थः। अन्यत्तु स्पृष्टं। दासस्य स्वस्वाध्यकर्मण्येव योग्यता न तु कर्माधिकारे। तथा स्मृतिकायादास्याः स्व
प्रसवनिमित्तमस्पृश्यत्वं मासमित्येव स्मृतं सपिंडासाधारणे चैव सद्यः शुध्यते। गर्भदासो भक्तदासस्त्र्यहाच्छुचिरिति स्मृतिः। तथा दासी
दासश्च सर्वो वै यस्य वर्णस्य यो भवेत्। तद्वर्णस्य भवेच्छौचं दास्या मासं तु सूतकमिति संगिरो वचनं मूलं। इदानीं जाताशौचे जनननिमित्तं
१७ यत्कार्यं तत्प्रसूतिमुत्तरार्द्धेनाह। जाते पत्ये तन्मंगलार्थं तस्याप्रत्यस्य मंगलार्थं कर्म तु तस्मिन्नहनि तस्यामेव निशि योग्या इत्यन्वयः। अ

अन्नेनोपात्तयोस्तु त्रिरजनिचरणाच्च दासादिकानां स्वाम्याशौचाहसंख्या समदिनगमनादूर्ध्वमन्यत्तु स्पृष्टं॥
जाते पत्ये तु तस्मिन्नहनि निशि च तन्मंगलार्थेषु योग्याः सर्वाशौचेष्वमदानो भवति यतिवनिब्रह्मचर्यस्थितानां॥२७॥

यमर्थः। अपत्यमंगलार्थानि कर्माणि यस्मिन्दिने यस्यां च निशि विहितानि तेषु प्रथमदिनसाध्येषु कर्मसु सूतकिनस्तस्मिन्काले यो
ग्याः अधिकारिणो भवंति। तथा च व्यासवाक्यं। सूतिकावासनिलया जन्मदानाम देवताः। तासां यागनिमित्तं तु शुद्धिर्जन्मनिकीर्तिता। प्रथ
मे दिवसे षष्ठे दशमे चैव सर्वदा। त्रिष्वेतेषु न कुर्वीत सूतकं पुत्रजन्मनि। उक्ताशौचस्य सर्वेषु रूपविषयेष्वपवादमाह। सर्वाशौचमि
ति। एतत्सर्वमाशौचं सदा सर्वकाले यतिः वनीवानप्रस्थः ब्रह्मचर्यस्थितसु भयविधो ब्रह्मचारी एतेषां न भवति। एते यस्मा
द्येन कस्यचिदप्याशौचभाजो भवंतीत्यर्थः॥२७॥

इदानीमग्नेसपादिद्रयानुपादे यत्वमेकविंशतितमहत्तनाह। जात। [illegible] र्थः विवाहात्प्राक् जातारण्याग्निनादग्धि
दाहः कार्यः। जातैरग्निः जातकर्मसमये यः रण्यास्तन्मथनेन सन्नेनेति यावत्। विवाहादूर्ध्वं आधानकालात् प्रोतधानादर्वाक् कृच्छ्रेण वैवा
ह्येनाग्निनादग्धिः। ततः ऊर्ध्वं आधानकालादनन्तरं। विध्याहितहुतवहनैः। विधिना आहितः विधुत्तौ धानारव्य संस्कारैः संस्कृता येदग्नि
णग्न्यादयस्तैरेव दग्धिः लौकिकेन। एतेषां जातारण्याग्न्यादीनामभावे लौकिकेना संस्कृतेनाग्निनादग्धिरिति सन्वयः। तदुक्तं वृद्धयाज्ञवल्क्येन।
आहितेन यथान्यायं दग्धव्यस्त्रिभिरग्निभिः। अनाहिताग्निरेकेन लौकिकेनापरोजन इति। क्वचित् लौकिकाग्न्यपवादमाह। चांडालाग्निमिति। प्रेत
दग्धौ चंडालाग्न्यादीन्जघान्नोपादद्यात्। उक्तं च देवलेन। चांडालाग्निरमेध्याग्निः सूतिकाग्निश्च कर्हिचित्। पतिताग्निश्चिताग्निश्च न शिष्टग्र
हणोचित इति। इंधनादावप्यपवादमाह। मृद्ग्राहतेनेत्यादि। इंधनं काष्ठं घृतमाज्यं आदिशब्देन पयः प्रभृति यदुपयुज्यते तत्संग्रहः। मृद्ग्राह

जातारण्याग्निनार्वाक् परिणयनविधेर्दग्धिराधानकालात् ऊर्ध्वं तु विध्याहितहुतवहनैर्लौकिकेनान्यभावे। चंडलाग्निं
चिताग्निं पतितहुतभुजं सूतिकामेध्यवह्नीन् जह्यात्मृद्ग्राहतैन्धनदहनघृताद्यैर्न दाहोऽप्यदाहः॥ २१॥ सर्वं तु सौ विदध्यादुपन
यनविधेः प्राक्परं तु स्वशाखागृह्योक्तैस्तद्विधानैः सकलशवविधिं ज्येष्ठपुत्रोवरोवा॥ पुत्राभावे क्रमेण स्वकुलजजननीवंशशिष्यर्त्विजोवा

तेंधनादिना योदाहः सोप्यदाह इति योजना। [illegible] इवेत्यर्थः। तथा चाह यमः। यस्यानयति शूद्रोग्निं तृणकाष्ठहवींषि च। प्रेतत्वं हि सदा
तस्य स चाधर्मेण लिप्यत इति। २१। [illegible] विशेनवृत्तेन दहनेतिकर्त्तव्यताधिकारिणं चाह। सर्वमिति। एतत्सर्वं दाहादिकं स। चूडाकरणो
त्तरं उपनयनविधेः प्राक् तूष्णीममंत्रकमेव विदध्यात्। तथा चोक्तं लोगाक्षिणा। तूष्णीमेवोदकं कुर्यात् तूष्णीं संस्कारमेव चेति। परं तु उपनयनान
न्तरं स्वशाखागृह्योक्तैस्तत्तद्विधानैर्विदध्यादिति स्पष्टं। [illegible] दाहिताहित [illegible] यादेति याज्ञवल्क्ययमनुसंधेयं। इदानीमधिका वचन ४
रिणं निरूपयति। सकलेति। सकलं सर्वशवविधिं प्रथमदिनमारभ्य दशाहान्तं स्वगृह्योक्तं कर्म ज्येष्ठः पुत्रोऽनुपपत्त्या वरो वा विदध्यादिति शे
षः। पुत्राभावे कर्त्तृविशेषं दर्शयति। क्रमेणेति। क्रमेण पूर्वाभावे पर इत्यनुक्रमेण। स्वकुलजः सपिंडः सोदको वा तदभावे जननीवंशसः
वंशजाः। तदभावे शिष्यः। तदभावे ऋत्विक् तदभावे आचार्यो विदध्यादित्यन्वयः। सकलस्य [illegible] दशाहान्तं [illegible] तेन दानकार्यः इति सूचितं॥

इदानीं मृत्यु विशेषाद्याशौचापवादमेकोनविंशेन वृत्तेनाह। नाशौचाइति। पतितासु संन्यस्तनोत्कासु पतिघातिनीषु च स्त्रीषु। स्तासु प्रस्त
तासु वर्णजातयः सपिंडा नाशौचभाजः प्राशौचभाजो न स्युः तथा दोषात् दोषेण हेतुना। येपाषंडं वेदाद्युक्तधर्माभासमाश्रयंते ते पाषंडिनः। अविहितलिं
लधारिण इति यावत्। चौराः प्रसिद्धास्तद्व्यवहाराः। आश्रमरहिताः स स्वा[illegible]धिकारे प्ययुक्ताश्रम विशेषपरिग्रहः। सुरापेयाः निषिद्ध
सुरापानरताः हीनोपगाः। अधमेन सहसंभोगरताः। आसु स्मृतासु च ज्ञातयो नाशौचाः स्युरितिसंबंधः। अत्र लिंगमविवक्षितं तथा संद
र्पी गर्वः तस्मात् दर्पेण बुद्धिपूर्वं सर्पादीन् दिवाकीर्तिश्चांडालस्तद्दंतान पक्रतुमाभिमुख्येन ये प्रवृत्ताः संतस्तैर्हतास्तेषु मृत्ते पुनाशौचाः
ज्ञातयो नाशौचाः स्युः। एभिर्दैवाद्धतेषु नेदमित्यर्थः। तथा स्वेच्छापूर्वं शस्त्रं लोहं ज्वलनोऽग्निः जलं वारि। विषं वत्सनाभादि। अनाशं
अविहितोन्नत्यागः। आदिशब्दाद्विहितभृगुपातादि। एभिः प्रकारैर्मृते च पि ज्ञातयो नाशौचाः स्युरिति पूर्वान्वयः। पाषंडान्नाश्रिता स्तेना
भर्तृघ्न्यः कामदिकाः सुराप्याश्चात्मत्यागिनो नाशौचोदकभाजनाः इति याज्ञवल्क्यस्मरणात्। १९। इदानीमाशौचान्निनो यदुपादेयं तदाह्। शाति

नाशौचं ज्ञातयः स्युः पतितपतिसुतब्रह्मविद्घातिनीषु दोषात्सापंडि चौराश्रमरहितसुरापेयहीनोपगासु॥ संदर्पी [illegible] सर्प
विप्रद्विति पशु दिवाकीर्तिकाद्यैर्हतेषु स्वेच्छापूर्वं च शस्त्रज्वलनजलविषानाशकाद्यैर्मृतेषु॥ १९॥ नाशौचं शाककंकाष्ठ जिनलवण
तृण क्षीरनीराभिषेषु पुष्पमूले फले चौषधदधिमधुघृतस्याजिने स्वामभोज्ये। दद्यादद्यादिमानि स्वयमनुमननात्स्वामिनो यातिजाता

नमवृत्तेनाह। यातिः जतिः मरणमिति यावत्। जातं जन्म तन्निमित्तमाशौचं यातिजाताशौचं तस्मिन्। क्रयविमेदा निमित्तांतर कृतेवाशौचे। एषु
शाकादिषु भभोज्यं तेषु द्रव्येषु आशौचं अपाशौचिसंबंधिदोषो न स्यात्। एतानि सर्वाशौचे च विना शुद्धानी त्यभिप्रायः। अन्नव ऽपि स प्रमं
दद्या तपक्वानिनाशौचानि स्वनेन प्रसेवं पोन्यानि। दद्यादिमानि स्वयमिति। अनुमननात्स्वाम्यनुज्ञया इमानि शाकादीनि स्वयमाशौचरहितः पुन
नन्वेभ्योददात्। स्वयं चाद्याच्च। एवं कृते दोषो न भवतीत्यभिसंधिः। तथा च पतितमपर्पितं च सर्वं पण्यं शुचिः स्यादिति स्मृतं। तथाह मरीचिः।
लवणे मधुमांसे च पुष्पमूलफलेषु च। शाककाष्ठतृणेष्वप्सु दधिसर्पिः पयः सु च। तिलौषधाजिने चैव पक्वापक्वे स्वयं ग्रहः। पण्येषु चैव सर्वेषु नाशौ
चं मृतसूतकयोरिति। अत्र पक्वं भ्रदजातं अपक्वं तंडुलादि [illegible] कं। पन्नसन्न प्रवृत्तानामानमन्नगर्हितं भुंक्ता

नं स्वयं गृह्णत्याशौचं २

॥ २० ॥

त्रि·स·

११

इदानीं शववहनयने वर्णविशेषेण द्वारविशेषमाह ॥ प्रत्यग्द्वारेति । भुवनिसुरं ब्राह्मणं मृतं नगर्याः प्रत्यग्द्वारात् पश्चिमदिग्
द्वारेण वहिर्नीययित्वा सर्वे ज्ञातीयाः वर्षीयः पूर्वं वृद्धपुरस्सरं यथाभवत्येवमनुयायुरनुययुः । अयमनुगमननियमो द्विवर्षाधिक
वयो मृते ज्ञेयः । तथाह याज्ञवल्क्यः । आश्मशानादनुव्रज्य इतरो ज्ञातिभिर्मृत इति । क्षत्रियं तूत्तरेण द्वारेण वैश्यं तु प्राक्द्वारेण । वृषलं
शूद्रं पितृदिशि दक्षिणस्यां दिशि यद्द्वारं तेन नाययित्वा सर्वे ज्ञातयो वर्षीयः पूर्वमनुयायुरित्यन्वयः । तथा च स्मृतिः । दक्षिणेन मृ
तं शूद्रं पुरद्वारेण निर्हरेत् । पश्चिमोत्तरपूर्वैस्तु यथासंख्यं द्विजातय इति । इदानीं वयोविशेषमृतस्यानुगमननियमापवा

प्रत्यग्द्वारान्नगर्या वहिर्भुवनिसुरं क्षत्रियं तूत्तरेण प्राग्द्वारेणैव वैश्यं पितृदिशि वृषलं नाययित्वानुयायुः ॥ शूद्रं २
वर्षीयः पूर्वमूनद्विशरदुपरतौ नानुयाने नियामः शूद्रैः स्पृष्टोऽथवोढो यदि भवति मृतः प्रेतभावान्न मुक्तिः ॥२४॥

दमाह । ऊनद्विशरदुपरताविति । ऊनद्विवार्षिके मृते सत्यामनुयानेऽनुगमने नियमो नास्ति । तदुपरतावनुगमनकर्तव्यता नावश्यकी
भवतीति यावत् । अत्रापि पूर्वोक्ता याज्ञवल्क्यस्मृतिर्मूलं । अथ शूद्रस्य स्पर्शकृतवहनयोर्दोषमाह । शूद्रैः स्पृष्टोऽथवोढो यदीति ।
यदि मृतः प्रेतः शूद्रैः स्पृष्टोऽथवा ऊढो भवति तदा तस्य प्रेतभावान्न मुक्तिः । एतत्तु सत्सु ब्राह्मणादिषु इति ज्ञेयं । तथा च मनुः । न वि
प्रं स्वेषु तिष्ठत्सु मृतं शूद्रेण हारयेत् । अस्वर्ग्या ह्याहुतिः सा स्याच्छूद्रसंस्पर्शदूषितेति ॥२४॥ ॥ ॥

तथा चगृह्यपरिशिष्टे॥ असगोत्रः सगोत्रो वा यदि स्त्री यदि वा पुमान्। प्रथमेऽहनि यो दद्यात् स दशाहं समापयेदिति। गौतमस्मृतिश्च॥ पु
त्राभावे सपिंडाः शिष्या अग्निदः पुत्रस्तदभावे स्वलिंगाचार्यो वेति। इतरो देश नियममाह। यत्रेति। यत्र यस्मिन्देशे प्रथमदिने विधिं कुर्यो
त्सोऽपि स एव देशः तत्स्तत्कालान्तदशाहपर्यन्तं तत्कर्मोऽद्रूतिशेषः। यत्र प्रथमदिनकृत्यं कृतं तत्रैव दशाहपर्यन्तं समापनीयमिति शेषः।
अभिसंधिः। अत्र देशनियमे शिष्टाचारो मूलमनुसंधेयं॥२२॥ अथ त्रयोविंशवृत्तं। आनाम्नः नामकरणं स्यात् तदुपरतेष्वितरेख
२५ नमात्रं खननमेव। मात्रशब्दार्थं स्पष्टयति। न जलहृत्तवहौ वितिप्रसंगे। नामवर्षत्रयान्तः नाम नामकरणं ततः प्रारभ्य वर्षत्रयान्तः वर्षत्रयमध्ये
उपरते। जलहृत्तवहो वामं स्वेच्छयानुष्ठेयो न नियतौ। ऊर्ध्वं वर्षत्रयानंतरं तत्कृतचूडे उपरते नित्यो नियतो भवतः। कृतचूडे तु विशे
षमाह। चौलयुक्ते नित्यौ कालविशेषादिति। कालविशेषाद्वर्षत्रयात् प्रागपि कृतचूडे तु नित्यौ। विस्पष्टः खननविधिमाह। अथे

आनाम्नः खननमात्रं न जलहृत्तवहौ नामवर्षत्रयान्तः कामं चौलं तु नित्यौ भवतदुपरते चौलके चौलयुक्ते॥
नित्यौ कालाविशेषाद्दयपितृमुखराः स्नापयित्वाम्बरस्रग्गन्धाद्यैः शोभयित्वा मृतमथ खननेनैव योऽग्नौ ज्यैदि लिप्य॥२३॥

ति। पितृमुखराः पितृमुख्याः। खननयोग्यं प्रेतं स्नापयित्वा। अथानंतरं अंबरस्रग्गन्धाद्यैः शोभयित्वा। अत्रोक्तविलिप्य निखनेदुरितिशे
षः। अत्र मूलं मनुः द्विवर्षं निखनेन्न कुर्यादुदकं ततः इति। याज्ञवल्क्यवचनं मूलं। तथा। ऊनद्विवार्षिकं प्रेतं निदध्युर्बांधवा बहिः। अलंकृत्य
शुचौ भूमावस्थिसंचयनादृते। नास्य कार्योऽग्निसंस्कारो नापि कार्योदकक्रिया। अरण्ये काष्ठवत्त्यक्त्वा क्षिपेयुस्त्र्यहमेव तु।
मनुवचनं। ऊनद्विवार्षिकं प्रेतं घृताक्तं निखनेद्बहिः। यमगाथां गायमानो यमसूक्तमनुस्मरन्। इति यमस्मर
णं मूलमित्यनुसंधेयं॥२३॥

अथ बहुंशेनकृतेनसंस्कारानंतरं यत्कार्यं तदाह। संस्कृत्येति। ते सकलकुलं ... सर्वैर्ज्ञातयः। बालपूर्वं बालप्रमुखवतः श्रेतं संस्कृत्य तदाह यि
त्वा संस्कारस्य लीमनी क्षमाणा नादेयेष पयसि व्रजित्वा। वृद्धपूर्वं वृद्धपुरःसरं यथा भवति एवं सवसनाः सवस्त्राः एकवारं निमज्य पाणाले त्रिः
त्रिवारं सकृदेकवारं वा प्रतिदिनं अपरहदशदिनावधि उदकं प्रदद्यीरन्निति संबंधः। उदकदाने वर्णभेदेन दिङ्नियमं विशदयितुं ताद्विशिनेष्टि।
ब्राह्मणइत्यादिना। ब्राह्मणोमृतवति दक्षिणस्याः दक्षिणाभिमुखाः क्षत्रिये मृतवति तूदङ्मुखाः विशि वैश्ये मृतवति प्राङ्मुखाः इति
अत्रमूलं। यथाविभागं शरीरमग्नौ नियोज्याः नवेक्षमाणाः अपोभ्युपयंतीति शातातपस्मृतिः। अत्र सवो धवा यथा दृष्टद्रुदक
मवतीर्यं नोद्धर्षयेयुः रुदन्तो ते प्रसंचेयुः परस्य यज्ञोपवीत वाससो दक्षिणाभिमुखा ब्राह्मणस्योदङ्मुखाः प्राङ्मुखाः क्षत्रियवैश्ययो
रिति प्रचेतोवचनं। तथा। सकृत्प्रसिंचेयुरुदकं नामगोत्रेणवाग्यताइति याज्ञवल्क्यस्मृतिरपि। त्रिः प्रसिंचेयुः उत्तरस्तृप्यन्त्विति प्रचेतोवच

संस्कृत्यानीक्षमाणाः सकलकुलभुवो बालपूर्वं व्रजित्वा नादेयेवृद्धपूर्वं पयसि सवसना एकवारं निमज्य। पाणालेत्रिः
सकृद्वा प्रतिदिनमुदकं ब्राह्मणोदक्षिणस्याः दाक्षत्रेनूदङ्मुखावैश्यमृतवृति विशितु प्राङ्मुखाः क्षेददीरन्। रक्षोस्नायुर्भूयो पि
तत्रत्रिनिशमनशना ज्ञातयोर्हनिशं वा क्रीतेत्सन्नाशना वा मितलवणापक्षा रमन्ते सजेयुः॥ स्त्रीसंगं मंगलानि व्यसनहसनमु

नमपि मृत्तानि सत्तु संधेयः॥२६॥ इदानीमुदकदानानंतरं यत्कार्यं तत्सप्तविंशतिप्रसेनाह। स्नायुरिति। ज्ञातयस्तत्र पयसि भूयोपि उदकदानानंतरं
नरपि स्नायुः स्नानंकुर्युः। ततस्तैर्यत्कर्तव्यं तदाह। त्रिनिशमिति। त्रिनिशं त्रिदिनं अनशनाः अकृतभोजनाः अभोजनाः संतः अहर्निशं एकमहो
रात्रं वा अनशनाः। क्रीतेत्सन्नाशना वा संतः। क्रीतं क्रयेणप्राप्तं उत्पन्नमयाचितं प्राप्तं तदशनाः। अमितलवणपयः क्षारमन्नं सजेयुः ए
तत्स्पष्टं। तथा स्त्रीसंगं मंगलानि मैथुनं हसनं च सजेयुः इति संबंधः। तथा उद्घोदनो व्यासनानि अपि सजेयुरिति पूर्वेणैव संबंधः। अधुनि
शाकृत्यमाह। ताणी स्त्रीणांहितो तइति। ताणां तृणानिर्मितमास्तरणं तेन निर्मितां अप्राह्य दिला यांक्षिति भूमिस्तु ज्ञातिनियताः ब्रह्मचर्यादिनिय
मस्था क्रीतोत्सन्नेन वा वर्तेरन्निति विशिष्टवचनं। तथा अक्षारालवणान्नास्युर्निमज्जेयुश्चतेत्र्यहं। मांसाशनं च नाश्नीयुः शयीरंश्च पृथक्
क्षितौ। इतिमनुवचनं॥ अधःशय्यासनिनोब्रह्मचारिणः सर्वे इति गौतमवचनं। मूलमित्यनुसंधेयं॥२७॥ ॥

इदानीमुदकदाने विशेषं पंचविंशतिश्लोकेनाह। ज्ञातीनामिति। ज्ञातयः सपिंडाश्च। मातापितरौ प्रसिद्धौ। परमगुरुराचार्यो मा
तामहश्च। एषामेव उदकदानं नित्यं॥ अयमर्थः॥ सपिंडानां सपिंडोद्देशेन। सोदकानां सोदकोद्देशेन। पुत्रस्य मातापित्रुद्दे
शेन। ब्रह्मचारिणः आचार्योद्देशेन। दौहित्रस्य मातामहोद्देशेन यदुदकदानं तन्नित्यमिति सर्वथा। अथाह याज्ञवल्क्यः॥
सप्तमाद्दशमाद्वापि ज्ञातयोऽभ्युपयंत्यपः॥ इति। तथा एवं मातामहाचार्यप्रेतानामुदकक्रियेति। इतरत्र नियमाभाव
माह। अपि मित्रेति। मित्रं सखा। प्रत्ता परिणीता। दुहिता स्वसा वा। स्वस्त्रीयादयः प्रसिद्धाः। एषामंभोदानं यथेच्छं कृ
या भवति नानियतं। तथाह याज्ञवल्क्यः॥ कामोदकं सखिप्रत्तास्वस्त्रीयश्वशुरर्त्विजामिति। केषांचिदुदकदानेकर्त

ज्ञातीनां मातृपित्रोरपि परमगुरोर्नियमंभोयं मित्रप्रत्तास्वस्त्रीयपाज्यश्वशुरर्त्विक्सुहृद्याजकानां यथेच्छं॥
नवाश्च ब्रह्मचारी व्रतियति पतित क्लीब पाखंड चौराः दद्युर्यैलं च पिंडानलजलकथनानर्हकास्तेतु सूतकाः॥२४॥

अपवादमाह। नवाश्च इत्यादिना। वा आस्यः सा विज्ञी पतितः। ब्रह्मचार्यादयः प्रसिद्धाः। एते प्रेतायोदकं दद्युरित्यन्वयः। ते के इत्य
पेक्षायामाह। ये त्विति। ये तु अत्र प्रेतसंज्ञे। पिंडानलजलकथनानर्हकाः पिंडाद्ययोग्यास्ते उदकानि न दद्युरिति। ते पि क इत्याकां
क्षायामाह। ते त्विति। ते तु पुनः सूतकाः पूर्वोक्ता एव। तथा च स्मृतिः। न ब्रह्मचारिणः कुर्युरुदकं पतितान चेति। वृद्धमनुरपि॥
क्लीबाद्या नोदकं दद्युः स्तेना व्रात्या विधर्मिणः॥ गर्भभर्तृद्रुहश्चैव सुराप्यश्चापि योषित इति॥ २५॥॥ ॥ ॥

त्रिं० स०

अथ वपनादि विधिमेकोनत्रिंशेन वृत्तेनाह। वर्षीयसीति। वर्षीयसि वृद्धे उद्गते संस्थिते सति तु पुनः सूतकांते द

१२ शमेऽहनि। उपरिवपनं नखच्छेदनं च कनीयांसः कुर्युरिति शेषः॥ उपरिवपनं मूर्द्धकेशश्मश्रुवपनं। वा अथवा

केचिन्मध्ये अंशौ च मध्ये द्वितीये तृतीये पंचमे सप्तमे वाह्निकर्त्तव्यमिमूचुः॥ तत्र देवलवचनं मूलं। दशमेऽहनि सं

प्राप्ते स्नानं ग्रामाद्बहिर्भवेत्। तत्र त्याज्यानि वासांसि केशश्मश्रुनखानि चेति। तथा चस्प संतरेऽपि॥ द्वितीयेऽहनि कर्त्तव्यं

वर्षीयस्युद्गते तूपरिवपननखच्छेदनं सूतकांते मध्ये वा केचिदूचुः पितृपरमगुरुष्वेवं वा पादिनि स्वं॥ ॥

थं ८ अत्र स्मार्त्तं शुभं भाणितं मं भाणितं स्वरस्वरच्छैवं विदितांकलादानं चेदघां दंशुभमयमिदं मनुरेभ्यः शुभाचें॥ २९॥

दूरकर्म प्रयत्नतः॥ तृतीये पंचमे वापि सप्तमे वाप्यथानतः॥ इति वपने निमित्तविशेषेणावश्यकतामाह। पितृपरमगुरुष्वे

ववापादिनि समिति। एवं वसंस्थितेषु वापो वपनं तदादि कर्म नित्यमावश्यकं पुत्रादीनां नेतरत्रेति भावः। तदुक्तं योगिनां कालीराणे५

भास्करक्षेत्रप्रयाग३ गंगायां भास्करक्षेत्रे मातापित्रोर्गुरोर्मृते॥ आधानकाले सोमे च वपनं सप्तसु स्मृतं॥ रेवातीरे भृगुक्षेत्रे कुरुक्षेत्रे च

वा कुटे। तुंगभद्रातटे रम्ये भास्करं तु विनिर्दिशेत्। इति मंडव्यसंहितायां॥ सूतकांते यत्कर्त्तव्यं तदाहात्रेति। यत्र यत्स्मा

र्त्तं कर्त्तव्यतया भाणितमुक्तं। यत्राणो क्रंतत्सर्वं स्वगृह्यतोऽविदित्वा अनंतरं कृत्वाऽनुष्ठाय पश्चाद्शुभमयमिदं अशुभमय

नाशाय शुभमग्रे प्रयच्च तु पुरुषैर्विप्रेभ्यो दद्यादित्येतत्स्पष्टं॥ २९॥ ॥ ॥

इदानीमुदकदाने विशेषं पंचविंशतिश्लोकेनाह। ज्ञातीनामिति। ज्ञातयः सपिंडाश्च। मातृपितरौ प्रसिद्धौ। परमगुरुराचार्यो मातामहश्च। एषामेव उदकदानं नित्यं॥ अथ मन्त्रीः॥ सपिंडानां सपिंडोद्देशेन। सोदकानां सोदकोद्देशेन। पुत्रस्य मातृपितृउद्देशेन। ब्रह्मचारिणः आचार्योद्देशेन। दौहित्रस्य मातामहोद्देशेन यदुदकदानं तन्नित्यमिति सर्वैः। अथाह याज्ञवल्क्यः॥ सप्तमाद्दशमाद्वापि ज्ञातयोऽभ्युपयंत्यपः॥ इति। तथा एवं मातामहाचार्यप्रेतानामुदकक्रियेति। इतरत्रानियमाभावमाह। अथ मित्रेति। मित्रं सखा। प्रत्ता परिणीता। दुहिता स्वसा वा। स्वस्त्रीयादयः प्रसिद्धाः। एषामंभोदाने यथेच्छं इच्छया भवति नानियतं। तथाह याज्ञवल्क्यः कामोदकं सखिप्रत्तास्वस्त्रीयश्वशुरर्त्विजामिति। केषांचिदुदकदानेकर्त्त

ज्ञातीनां मातृपित्रोश्चापि परमगुरोर्नित्यमंभो यमित्रप्रत्तास्वस्त्रीयपाल्यश्वशुरगुरुसुहृद्याजकानां यथेच्छं॥
नव्रात्यब्रह्मचारिव्रतियतिपतितक्लीबपाषंडचौराः दद्युर्ये लंत्रे पिंडानलजलकथनानर्हकास्ते तु सूताः॥२५॥

अपवादमाह। नव्रात्येत्यादिना। व्रात्यः सावित्रीपतितः। ब्रह्मचार्यादयः प्रसिद्धाः। एते प्रेताय उदकं न दद्युरित्यन्वयः। ते के इत्यपेक्षायामाह। ये त्विति। ये तु अत्र प्रेतसंगे। पिंडानलजलकथनानर्हकाः पिंडाग्न्ययोग्यास्ते उदकानि न दद्युरिति। ते पि क इत्याकांक्षायामाह। ते त्विति। ते तु पुनः सूताः पूर्वोक्ता एव। तथा च स्मृतिः। न ब्रह्मचारिणः कुर्युरुदकं पतितान चेति। वृद्धमनुरपि॥ क्लीबाद्या नोदकं दद्युः स्तेना व्रात्या विधर्मिणः॥ गर्भभर्तृद्रुहश्चैव सुराप्यश्चापि योषित इति॥ २५॥ ॥ ॥

ग्रं॰ सं॰ 13

अथवपनादि विधिमेकोनत्रिंशेन वृत्तेनाह। वर्षी यसीति। वर्षीयसि वृद्धे उद्गते संस्थिते सति तु पुनः सूतकांते द
१२ शमेहनि। उपरिवपनं नखच्छेदनं च कनीयांसः कुर्युरिति शेषः॥ उपरिवपनं मूर्द्धकेशस्मश्रुवपनं। वा अथवा
केचिन्मध्ये अशौचमध्ये द्वितीये तृतीये पंचमे सप्तमे वाह्निकर्त्तव्यमिति ऊचुः॥ तत्र देवलवचनं मूलं। दशमेहनि सं
प्राप्ते स्नानं ग्रामाद्बहिर्भवेत्। तत्र त्याज्यानि वासांसि केशस्मश्रुनखानि चेति। तथा च स्मृत्यंतरेपि॥ द्वितीयेहनि कर्त्तव्यं

वर्षीयस्युद्गते तूपरिवपननखच्छेदनं सूतकांते मध्ये वा केचिदूचुः पितृपरमगुरुष्वेवं वापादिनित्यं॥ ॥
धै॰ ८ अत्र स्मार्त्तं शुभं भणितं मं भणितं स्वखगृह्यैर्विदित्वा कृत्वा दानं च दद्यात् सुभमयमिदं भूसुरेभ्यः सुभाचैः॥२८॥

क्षुरकर्म प्रयत्नतः। तृतीये पंचमे वापि सप्तमे वा प्रयत्नतः। इति वपने निमित्तविशेषे एवावश्यकतामाह। पितृपरमगुरुष्वे
नवापादिनित्यमिति। एष्वेव संस्थितेषु वापो वपनं तदादिकर्म नित्यमवश्यकं पुत्रादीनां नेतरत्रेति भावः। तदुक्तं योगिना। कालीदासे ५
भास्कर दे गंगायां भास्करक्षेत्रे मातापित्रोर्गुरोर्मृते॥ आधानकाले सोमे च वपनं सप्तसु स्मृतं॥ रेवातीरे भृगुक्षेत्रे कुरुक्षेत्रे च
प्रयागः ३ वा कुटे॥ तुंगभद्रातटे रम्ये भास्करं तु विनिर्दिशेत्। इति मांडव्यसंहितायां॥ सूतकांते यत्कर्त्तव्यं तदाहात्रेति। यत्र यत्स्मा
र्त्तं कर्त्तव्यतया भणितमुक्तं। यत्स्नानोक्तं तत्सर्वं स्वगृह्यतो विदित्वा अनंतरं कृत्वा अनुष्ठाय पश्चात्सुभमयमिदं अत्र सुभमय

मारार्थं सुभमन्त्रार्थं च मृतगुरुभ्यो विप्रेभ्यो र्दद्यादित्येतत्स्पष्टं॥२९॥ ॥ ॥

इदानीं दशाहसर्वं प्रविधिमध्यविंशेनवृत्तेनाह। संस्कर्त्रेति। संस्कर्त्ता दाहकः दहनतः दहनानंतरं प्रत्यहं प्रतिदिनं दशाहाव
धिः। दर्भपुंजे भूमावेवौंस्तृते दर्भसमुदाये एकैकं पिंडं समर्प्य यामवत्ति प्रावपेद्दद्यात्। तथा च स्मृतिः। नवभिर्दिवसैर्दद्यान्नवपिं
डान्समाहितः। दशमं पिंडमुत्सृज्य रात्रिशेषे शुचिर्भवेदिति। अत्र भूमाविशानेन पाषाणादिव्यावृत्तिः सूचिता। तथा चोक्तं शंखेन। भू
मौ माल्यं पिंडं पानीयमनुलेपनं च दद्युरिति। पिंडदानेद्रव्यनियममाह। प्रथमेति। प्रथमदिने यच्चरुद्रव्यं तदेवोपरिष्टाद्यावद्द

संस्कर्त्ता दर्भपुंजे समर्प्य दहनतः प्रत्यहं पिंडमेकं भूमावेवावपेत प्रथमदिनचरुद्रव्यमेवोपरिष्टात्॥
दाहाह्नादेव गण्यं चयनदिनमिदं चादितो ह्नां चतुर्णामेकस्मिन्सप्तमे वाह्नि नवमदिने वोपपेतं तु नैतत्॥२८॥

शाहं कर्त्तव्यं न तु द्रव्यांतरमुपादेयमित्यावत्। तदुक्तं पुनः ऋष्यमुनिना॥ शालिना सक्तुभिर्वापि शाकैर्वाप्युपनिर्वपेत्। प्र
थमेऽहनि यद्द्रव्यं तदेव स्याद्दशाहिकमिति॥ अथ संचयनकालमाह। दाहाह्नादेवेति। चयनदिनं दाहाह्नादेव गण्यं न तु म
रणदिनात्। अस्थिसंचयने दाहान्मतोऽहस्तु यथातिथि इति संग्रहवचनात्। इदं च चयनं आदितः दाहदिनतः यानि चत्वारि
दिनानि तेषां चतुर्णां दिवसानां मध्ये एकस्मिन्दिने। दाहतः सप्तमे वाहनि। नवमे वा कार्यमिति शेषः। तथा च संवर्त्तः॥ प्रथ
मेऽह्नि तृतीये वा सप्तमे नवमे पि वा। अस्थिसंचयनं कार्यं दिने तद्गोत्रजैः सह इति। स्मृत्यंतरे च। द्वितीये तस्थिसंचय इति विष्णुः।
चतुर्थे दिवसे स्थिसंचयनं कुर्यात्तेषां गंगाम्भसि प्रक्षेप इति॥२८॥

० भा० अथ शवं दग्ध्वा आगतानां प्रेतगृहप्रवेशनविधिं त्रिंशेन वृत्तेनाह। दत्वेति। सपिंडाः पूर्वोक्ताः तथा परशववहन ८१
४ स्नापकाः॥ अ सपिंडाश्च सर्वे पिंडं दत्वा। दत्ते पिंडे तद्दूरमतस्य सर्वं पितृगृहं व्रजित्वा अस्य वेश्मनो द्वारि प्रशमि
तमनसः अविहितचित्ताः संतः निंबपत्रं विदश्य चर्वित्वा पश्चादाचम्यानंतरं अग्न्यंबुप्रभृतीन् प्रसिद्धान् स्पृष्ट्वा।

14

दत्वा पिंडं सपिंडाः परशवदहनस्नापकाश्च व्रजित्वा तद्दूरसद्मद्वारि चाऽस्य प्रशमितमनसो निंबपत्रं
विदश्य॥ आचम्याग्न्यंबुदूर्वांकुरवरवृषभान् दत्तान् गोमयं च स्पृष्ट्वा सिद्धार्थतैलान्यंघद्व
दिपदं न्यस्य सर्वे विशेयुः॥ ३०॥ इति श्रीमद्भोजिदीक्षितेन विरचिता त्रिंशत्श्लोकी समाप्ता॥

दृषदि पदं न्यस्य दत्वा गृहं प्रविशेयुरिति संबंधः॥ तथा च स्मृतिः॥ इति संस्कृत्य गच्छेयुर्गृहं बालपुरःसराः। विदश्य निंब
पत्राणि नियता द्वारि वेश्मनः॥ आचम्याग्न्यादि सलिलं गोमयं गौरसर्षपान्॥ प्रविशेयुः समालभ्य कृत्वा श्मनि पदं
शनैरिति॥ ३०॥ इति श्रीरामचंद्राचार्यविरचितं त्रिंशत्श्लोकाः भाष्यं समाप्तं॥ लिखितं मन्नूरामेण स्वपठनार्थं। संवत् १९
५८

।श्रीहरद् श्लोकी

15

उपादिवसास्थसप ... पुंभागद